## 91 - एकनवतितम दशकम्
## भक्ति स्वरूप वर्णनम्

श्रीकृष्ण त्वत् पदोपासनं अभय तमं बद्ध मिथ्यार्थ दृष्टेः
मर्त्यस् यार्तस्य मन्ये व्यपसरति भयं येन सर्वात्म नैव ।
यत् तावत् त्वत् प्रणीतान् इह भजन विधीन् आस्थितो मोहमार्गे
धावन् नाप्या वृताक्षः खलति न कुहचिद् देवदेवा खिलात्मन् ॥91-1॥

भूमन् कायेन वाचा मुहुरपि मनसा त्वद्बल प्रेरितात्मा
यद्यत् कुर्वे समस्तं तदिह परतरे त्वय्यसा वर्पयामि ।
जात्या पीह श्वपाकः त्वयि निहित मनः कर्म वागिंद्रियार्थ
प्राणो विश्वं पुनीते न तु विमुखमनाः त्वत् पदाद् विप्रवर्यः ॥ ॥91-2॥

भीतिर् नाम द्वितीयाद् भवति ननु मनः कल्पितं च द्वितीयं
ते नैक्याभ्यास शीलो हृदय मिह यथाशक्ति बुद्ध्या निरुंध्याम् ।
मायाविद्धे तु तस्मिन् पुनरपि न तथा भाति मायाधिनाथं
तं त्वां भक्त्या महत्या सतत मनुभजन् ईश भीतिं विजह्याम् ॥91-3॥

भक्ते रुत्पत्ति वृद्धी तव चरण जुषां संगमे नैव पुंसा
आसाद्ये पुण्य भाजां श्रिय इव जगति श्रीमतां संगमेन ।
तत् संगो देव भूयान् मम खलु सततं तन्मुखा दुन्मिषद्भिः
त्वन् माहात्म्य प्रकारैः भवति च सुदृढा भक्ति रुद्धूत पापा ॥ ॥91-4॥

श्रेयो मार्गेषु भक्तौ अधिक बहुमतिर् जन्म कर्माणि भूयो
गायन् क्षेमाणि नामान् यपि तदुभयतः प्रद्रुतं प्रद्रुतात्मा ।
उद्यद्धासः कदाचित् कुहचिदपि रुदन् क्वापि गर्जन् प्रगायन्
उन्मादीव प्रनृत्यन् अयि कुरु करुणां लोक बाह्यश्च रेयम् ॥ ॥91-5॥

भूतान्येतानि भूतात् मकमपि सकलं पक्षि मत्स्यान् मृगादीन्
मर्त्यान् मित्राणि शत्रूनपि यमित मतिस् त्वन्मया न्यानमानि ।
त्वत् सेवायां हि सिद्ध्येत् मम तव कृपया भक्ति दार्ढ्यं विराग:
त्वत् तत्वस् यावबोधोऽपि च भुवनपते यत्न भेदं विनैव ॥ ॥91-6॥

नो मुह्यन् क्षुत्-तृडाद्यै: भव सरणि भवै: त्वन् निली नाश-यत्वात्
चिंता सातत्यशाली निमिष लवमपि त्वत् पदाद प्रकंपः ।
इष्टानिष्टेषु तुष्टि व्यसन विरहितो मायिक त्वाव बोधात्
ज्योत्स्नाभिस् त्वन् नखेंदो: अधिक शिशिरिते नात्मना संचरेयम् ॥ ॥91-7॥

भूतेष्वेषु त्वदैक्य स्मृति समधि गतौ नाधिकारोऽधुना चेत्
त्वत् प्रेम त्वत्क मैत्री जडमतिषु कृपा द्विट्सु भूया दुपेक्षा ।
अर्चायां वा समर्चा कुतुक मुरुतर श्रद्धया वर्धतां मे
त्वत् संसेवी तथापि द्रुत मुपलभते भक्त लोकोत्त मत्वम् ॥ ॥91-8॥

आवृत्य त्वत् स्वरूपं क्षिति जल मरुदाद् यात्मना विक्षिपंती
जीवान् भूयिष्ठ कर्मा वलि विवश गतीन् दुःखजाले क्षिपंती ।
त्वन्माया माभि भून् माम् अयि भुवनपते कल्पते तत् प्रशांत्यै
त्वत्पादे भक्तिरेवेति अवद दयि विभो सिद्धयोगी प्रबुद्धः ॥ ॥91-9॥

दुःखा न्यालोक्य जंतुषु अल मुदित विवेकोऽह माचार्यवर्यात्
लब्ध्वा त्वद्रूप तत्त्वं गुण चरित कथाद् युद्भवद् भक्ति भूमा ।
माया मेनां तरित्वा परम सुख मये त्वत्पदे मोदिताहे
तस्यायं पूर्व रंगः पवनपुर पते नाश याशेष रोगान् ॥ ॥91-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥

STOTRADHWANI